O. P. JINDAL SCHOOL, SAVITRI NAGAR

Half Yearly Examination (2026– 2027)

Class X **MM: 50**
Subject: Sanskrit **Time: 2. Hrs**
Name: _____ Roll No.: _____

General Instructions: All questions are compulsory

निर्देशाः– 1) प्रश्नपत्रे चत्वारि खण्डानि सन्ति।

खण्ड 'क'	पठित अवबोधनम्	(08 अङ्काः)
खण्ड 'ख'	रचनात्मकं कार्यम्	(10 अङ्काः)
खण्ड 'ग'	अनुप्रयुक्तव्याकरणम्	(12 अङ्काः)
खण्ड 'घ'	पठित–अवबोधनम्	(20 अङ्काः)

2) सर्वे प्रश्नाः अनिवार्याः।
3) प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4) प्रश्नसंख्या अवश्यं लेखनीयम्।
5) उत्तराणि संस्कृतेन एव लेखनीयानि।

(खण्ड–क) पठित अवबोधनम्

प्र0 1 अधोलिखितम् अनुच्छेदं ध्यानेन पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–

(निम्नलिखित गद्यांश को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

एकदा पंजाबराज्यस्य नृपः महाराजः रणजीतसिंहः आखेटाय सैनिकैः सह वनमगच्छत्। ते एकस्मिन् स्थाने वृक्षस्य अधः वार्ताम् कुर्वन्ति स्म तदैव एकं प्रस्तरं तस्य दक्षिणे नेत्रे अपतत्। तेन तस्य तन्नेत्रे अतीव पीड़ा उत्पन्ना अभवत् तस्माच्च नेत्रात् रक्तबिन्दवः अपि अपतन्। महाराजः पीडया तत्रैव उपाविशत्। तदा तस्य सैनिकाः एकां स्त्रीं गृहीत्वा तत्रानयन्। ते कथितवन्तः–"नृपेन्द्र! इयमेव अपराधिनी महिला भवन्तं पीडितम् अकरोत् अतः एतस्यैः दण्डयतु भवान्।" नृपः ताम् अवदत्–"अहं तव अपराधी नासम्। त्वां प्रति किंचित् कथितमपि न। पुनः कथं त्वं माम् आहतं कृतवती ?" रोदन्ती सा अवदत्–"महाराज! गृहे मम बालाः बुभुक्षिताः सन्ति अतः अहं प्रस्तरखण्डैः एतस्य वृक्षस्य फलानि अत्रोटयम्। परं दुर्दैववशात् प्रस्तरं भवन्तं अपीडयत्। क्षमस्व माम्। अहं अज्ञाने एव ईदृशं कृतवती। पुनः कदापि ईदृशम् अपराधं न भविष्यति।" इदं श्रुत्वा दयालुः नृपः तां स्त्रीम् अमोचयत्।

I एकपदेन उत्तरत – *(केवलं प्रश्नद्वयम्)* **(½x2=1)**

i नृपस्य नाम किमासीत् ?
ii नृपस्य नेत्रात् के अपतन् ?
iii नृपः कीदृशः आसीत् ?

II पूर्णवाक्येन उत्तरत– *(केवलं प्रश्नद्वयम्)* **(2x2=4)**

i सैनिकाः किं कथितवन्तः ?
ii ते कुत्र वार्तां कुर्वन्ति स्म ?
iii रोदन्ती स्त्री किम् अवदत् ?

IV प्रदत्तः विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत–*(केवलं प्रश्नत्रयम्)* **(1x3=3)**

i 'अतः एतस्मै दण्डयतु भवान्।' इत्यत्र कर्तृपदम् किम् ?
(अ) एतस्मै (ब) दण्डयतु (स) भवान् (द) अतः

ii 'गृहे मम बालाः .....।' अत्र 'मम' पदं कस्मै प्रयुक्तम् ?
(अ) नृपाय (ब) सैनिकाय (स) स्त्रियै (द) वृक्षाय

प्र0 4 अधोलिखितां कथां मंजूषायाः सहायतया उचितपदैः पुनः लिखत– **(8x½=4)**

(निम्नलिखित कहानी को मंजूषा में प्रदत्त उचित उत्तर की सहायता पुनः लिखिए)

एकदा उज्जयिन्यां (1) ——— : नाम ब्राह्मणः अवसत्। सः धनहीनः परं (2) ——— आसीत्। एकस्मिन् दिवसे तस्य पत्नी स्वनवजातं (3) ——— तस्य रक्षायाम् अवस्थाप्य स्नातुम् अगच्छत्। अथ ब्राह्मणः राज्ञा श्राद्धार्थम् निमन्त्रितः। ब्राह्मणः (4) ——— अचिन्तयत्।– "यदि 'शीघ्रं तत्र न गमिष्यामि तर्हि अन्य (5) ——— श्राद्धार्थम् वृत्तो भविष्यति तदा मम (6) ——— भविष्यति"। इदं चिन्तयित्वा माधवः चिरकालपालितं (7) ——— नकुलं बालकस्य रक्षायां अवस्थाप्य राजगृहे (8) ——— ग्रहीतुं गतः।

माधवः, वस्तुहानिः, शिशुम्, स्वामिभक्तम्, सहजदारिद्र्यात्, श्राद्धम्, कश्चित्, विद्वान्,

अथवा

अधोलिखितं संवादं मंजूषायाः सहायतया उचितपदैः पुनः लिखत– **(1x4=4)**

(निम्नलिखित संवाद को मंजूषा में प्रदत्त उचित उत्तर की सहायता पुनः लिखिए)

छात्रा – आचार्य ! नमो नमः।
योगाचार्यः – शुभमस्तु (1) ——————————— ।
छात्रा – मम नाम स्वयंप्रभा अस्ति। योगशिक्षां प्रति मम रुचिः अस्ति।
योगाचार्यः – शोभनम् (2) ——————————— ।
छात्रा – अहं दशमकक्षायां पठामि। आचार्य ! (3) ——————————— ।
योगाचार्यः – योगः तु सर्वेभ्यः एव अतीव लाभकरः। विद्याध्ययने तु योगशिक्षा उपयोगिनी एव।
छात्रा – मया श्रुतं यद् अधुना सम्पूर्णे विश्वे योगदिवसः मान्यते।
योगाचार्यः – (4) ——————————— ।
छात्रा – मम अनुजः किंचिद् अस्वस्थः वर्तते। किं तस्य कृते अपि लाभकरः ?
योगाचार्यः – आम् स्वास्थ्याय योगः अनिवार्यः अतः तेन अपि योगः कर्तव्यः।

मञ्जूषा –

(क) भवत्याः नाम किम् ? **(ख)** किं योगः छात्राणां कृते उपयोगी अस्ति ?
(ग) भवती कस्यां कक्षायां पठति ? **(घ)** सम्यक् श्रुतं त्वया, जूनमासस्य एकविंशतितमे दिवसे प्रतिवर्षम् अन्तराष्ट्रिय योगदिवसः मन्यते ?

(खण्ड–ग) अनुप्रयुक्तव्याकरणम्

प्र0 5 अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत। **(1x3=3)**
(निम्नलिखित वाक्यों में रेखांकित *तीन* पदों का विकल्पों में से समास या विग्रह कीजिए)

i अनिच्छन् अपि वार्ष्णेय बलादिव नियोजितः।
(क) अन् इच्छन् (ख) न इच्छन्
(ग) अनि इच्छन् (घ) अनि + च्छन्

ii अस्माकम् ऐक्यं तु जगत्प्रसिद्धम्।
(क) जगत् प्रसिद्धम् (ख) जगतः प्रसिद्धम्
(ग) जगति प्रसिद्धम् (घ) जगतप्रसिद्धम्

iii मयूरः साट्टहासं प्रविशति।
(क) अट्टहासेन सह (ख) अट्टहासे सह
(ग) अट्टहासं सह (घ) अट्टहासयोः सह

iv शक्रः तत् नेत्रं यथास्थानम् स्थापितवान्।
(क) उचितं स्थानम् (ख) यथा स्थानम्
(ग) स्थानस्य पश्चात् (घ) स्थानम् अनतिक्रम्य

प्र0 6 प्रदत्त विकल्पेभ्यः उचितानि प्रत्ययायाः उत्तराणि चित्वा लिखत– **(1x3=3)**
(निम्नलिखित वाक्यों का उचित विकल्पों में से उत्तर चुनकर लिखिए)

i कार्यं तु सदैव ध्यानेन **करणीयम्**।
(क) कर् + अनीयर् (ख) कृ + अनीयर्
(ग) कृ + अणीयर् (घ) कर् + अनीयः

ii भगवान् बोधिसत्वः अपूर्वः **धैर्य + मतुप्** अपि आसीत्।
(क) धैर्यमान् (ख) धैर्यमान्यः
(ग) धैर्यवान् (घ) धैर्यवत्

iii महात्मनः तदैव **समत्वम्** इति आहुः।
(क) सम + क्त्वा (ख) सम + त्वम्
(ग) सम + तल् (घ) सम + त्व

iv माता सदैव **पूजनीय + टाप्** भवति।
(क) पूजनीया (ख) पुजनीयम्
(ग) पूजननीया (घ) पूजनीयः

प्र0 7 वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा संवादं पुनः लिखत– **(½x4=2)**
(वाच्य के अनुसार उचित पद चुनकर संवाद को पुनः लिखिए)

प्रतिमा – (1) ..... किं खादसि ?

भावना – मया फलम् एव (2) ..... ।

प्रतिमा – शोभनम्! किं त्वया दुग्धम् अपि पीयते ?

भावना – आम्, अहं (3) ..... अपि पिबामि।

प्रतिमा – मया तु रात्रौ भोजनं न क्रियते।

भावना – अहम् अपि रात्रौ (4) ..... न खादामि।

खाद्यते,	दुग्धम्,	अन्नम्,	त्वम्

प्र0 8 अधोलिखितवाक्येषु मंजूषायां प्रदत्तैः उचितअव्ययपदैः रिक्तस्थानानि पूरयत– **(½x4=2)**

(मंजूषा में दिए गए उचित अव्यय पदों से रिक्तस्थान को पूरा कीजिए) (केवलंप्रश्नचतुष्टयम्)

पुरा, कदा, श्वः, तर्हि, यथा,

i मधुरभाषिणी वाणी ..... पुरुषं प्रह्लादयति।

ii ..... दुष्यन्तः नाम नृपः अभवत्।

iii अहं नाटकं द्रष्टुम् ..... गमिष्यामि।

iv यदि अहं तव सन्ततिं न पालयामि ..... कुत्र स्युः पिकाः।

v आचार्यः नगरात् अत्र ..... आगमिष्यति ?

प्र0 9 अधोलिखित वाक्येषु रेखांकितपदं शुद्ध रूपं विकल्पेभ्यः चित्वा लिखत– **(½x4=2)**

(निम्नलिखित वाक्यों का उचित विकल्पों में से उत्तर चुनकर लिखिए)

i **वृक्षः** परोपकाराय फलन्ति।

(क) वुक्षानि (ख) वृक्षाः

(ग) वृक्षे (घ) वृक्षात्

ii सः **मधुरं** फलानि खादति।

(क) मधुरः (ख) मधुराणि

(ग) मधुराः (घ) मधुरम्

iii संन्यासी अवदत् – अलं **विवादाय**।

(क) विवादेन (ख) विवादानि

(ग) विवादात् (घ) विवादम्

iv द्वे बालिके विद्यालयं **गच्छति**।

(क) गच्छसि (ख) गच्छथः

(ग) गच्छतः (घ) गच्छन्ति

(खण्ड–घ) पठित अवबोधनम्

प्र0 10 अधोलिखितम् अनुच्छेदम् पठित्वा तद् आधारितान् प्रश्नानाम् उत्तराणि लिखत–

(निम्नलिखित गद्यांश को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

अथ अन्यस्मिन् अहनि सः मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः। ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तेषु केचिद् दग्धाः, केचिद् अर्धदग्धाः, केचन च पंचत्वं गताः।

I **एक पदेन उत्तरत–** (केवलं प्रश्नद्वयम्) **(½x2=1)**

i अश्वशालाम् कः प्रविशति ?

ii अश्वाः प्राणत्राणाय कुत्र अधावन् ?

iii वह्निना जाज्वल्यमानशरीरः मेषः कुत्र प्रविशति ?

II **पूर्णवाक्येन उत्तरत–** (केवलं प्रश्नद्वयम्) **(1x2=2)**

i यदा मेषः क्षितौ अलुठत् तदा किम् अभवत् ?

ii मेषः केन अर्धज्वलितकाष्ठेन ताडितः ?

iii सः मेषः यावत् महानसं प्रविशति तावत् किम् अभवत् ?

III **उचितम् उत्तरम् चित्वा लिखत–** (केवलं प्रश्नद्वयम्) **(1x2=2)**

i 'दिने' अस्य पर्यायवाचि पदं गद्यांशात् चिनुत ?

ii 'तेषु केचिद् दग्धाः।' अस्मिन् वाक्ये क्रियापदम् किम् ?

iii 'तस्य क्षितौ प्रलुठतः'– अत्र 'तस्य' इति पदं कस्मै प्रयुक्तम् ?

प्र0 11 अधोलिखितम् नाट्यांशम् पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–

(निम्नलिखित नाट्यांश को ध्यान से पढ़कर निर्देशानुसार प्रश्नों के उत्तर दीजिए)

काकः – रे परभृत्! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः ?
अतः अहम् एव करुणापरः पक्षिसम्राट् काकः।

राज़हंसः – शान्तं शान्तम्। अहमेव नीरक्षीरविवेकी पक्षिणां राजा।

बकः – धिक् युष्मान्। अहमेव सर्वशिरोमणिः। (ततः प्रकृतिमाता प्रविशति)

प्रकृतिः – (सस्नेहम्) अलं अलम् मिथः कलहेन। अहं प्रकृतिः एव युष्माकं जननी।
यूयं सर्वे एव मम प्रियाः। सर्वेषामेव महत्वं विद्यते यथासमयम्। सर्वैः एव मे शोभा।
न तावत् कलहेन समयं वृथा यापयेत।

I **एकपदेन उत्तरत**–(केवलं प्रश्नद्वयम्) **(½x2=1)**

i करुणापरः पक्षिसम्राट कः ?

ii काकः कस्याः सन्ततिं पालयति ?

iii नीरक्षीरविवेकी कः पक्षी कथ्यते ?

II **पूर्णवाक्येन उत्तरत–** (केवलं प्रश्नद्वयम्) **(1x2=2)**

i प्रकृतेः शोभा कैः वर्तते ?

ii केन समयं वृथा न यापयेत ?

iii यथासमयम् केषाम् महत्वं विद्यते ?

III **उचितम् उत्तरम् चित्वा लिखत–** (केवलं प्रश्नद्वयम्) **(1x2=2)**

i 'परस्परम्' इति अर्थे किं पदम् अत्र प्रयुक्तम् ?

ii 'पक्षिसम्राट्' इति पदं कस्य विशेषणपदम् अस्ति ?

iii 'अहं एव सर्वशिरोमणिः' अस्मिन् वाक्ये कर्तृपदम् किम् अस्ति ?

प्र0 12 अधोलिखित वाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत– **(1x3=3)**

(निम्नलिखित वाक्यों को रेखांकित पदों के आधार पर प्रश्ननिर्माण कीजिए) (केवलं प्रश्नत्रयम्)

i सरस्वत्याः कोशः व्ययतः वर्धते।

ii भवतः दानवीरतां आकर्ण्य आगतोऽस्मि।

iii मयूरस्य नृत्यं प्रकृतेः आराधना।

iv कामः एव क्रोधं जनयति।

v दानशालासु विचरन् सः राजा अचिन्तयत्।

प्र0 13 निम्नलिखित श्लोकयोः अन्वयं मंजूषा सहायतया पुनः लिखत– **(½x4=2)**

(निम्नलिखित श्लोकों को पढ़कर मंजूषा से शब्द चुनकर अन्वय को पूरा कीजिए)

(क) शक्रोऽहमस्मि देवेन्द्रस्त्वत्समीपमुपागतः।

वरं वृणीष्व राजर्षे! यदिच्छसि तदुच्यताम्।।

अन्वयः – राजर्षे! अहं (1) ..... अस्मि, त्वत् समीपम् (2) ..... अस्मि।

(3) ..... वृणीष्व यद् (4) ..... तत् उच्यताम्।

उपागतः, वरं, शक्रः, इच्छसि

अथवा

(ख) तस्मात् स्यात् कलहो यत्र गृहे नित्यमकारणः।

तद्गृहं जीवितंवांछन् दूरतः परिवर्जयेत् ।।

अन्वयः – तस्मात् यत्र गृहे (1) ..... अकारणः (2) ..... स्यात्

(3) ..... वांछन् तद्गृहं (4) ..... परिवर्जयेत्।

कलहः, दूरतः, नित्यम्, जीवितम्

प्र014 निम्नवाक्येषु रेखांकितानां पदानां प्रसंगानुसारं विकल्पेभ्यःशुद्धम् अर्थं चिनुत–

(निम्नलिखित वाक्यों को विकल्पों से उचित अर्थ चुनकर लिखिए) **(½x4=2)**

i <u>लोके</u> चक्षुर्दानं दुष्कर इति।

(क) गृहे (ख) संसारे

(ग) विद्यालये (घ) स्थले

ii मधुमासे <u>कोकिलः</u> पंचमस्वरेण गायति।

(क) वायसः (ख) वसन्तः

(ग) काकः (घ) पिकः

iii <u>अवधीरिताः</u> अस्माभिः गुरुजनोपदेशाः ।

(क) धारिताः (ख) स्वीकृताः

(ग) न मानिताः (घ) मानिताः

iv पाप्मानं <u>प्रजहि</u> ह्येनं ज्ञानविज्ञाननाशनम्।

(क) मारय (ख) मरणात् पूर्वम्

(ग) त्यज (घ) पाठय

प्र015 मञ्जूषायाः सहायतयाः पाठाधारितकथायाः पूर्तिकृत्वा रिक्तस्थानानिपूरयत **(½x6=3)**

(मंजूषा की सहायता से कहानी को पूरी करके उत्तरपुस्तिका में पुनः लिखिए)

एकदा स्वपुण्यानां फलैः बोधिसत्वः शिवीनां राजा अभवत्। सः अतिविनम्रः (1) ——— च आसीत्। प्रजाकल्याणार्थं सः सर्वत्रः (2) ——— निर्माणम् अकरोत्। एतासु दानशालासु अर्थिनः आगत्य अभीष्टानि वस्तूनि लभन्ते स्म। (3) ——— राजा दानशालासु विचरन् सन्तुष्टानाम् (4) ——— विरलसंख्यां दृष्ट्वा दुःखी अभवत्। राजा स्वशरीरस्य दानं कर्तुं निश्चयम् अकरोत्। एतत् ज्ञात्वा सर्वे एव (5) ——— संजाताः। तस्य दानशीलतां परीक्षितुम् (6) ——— तत्र आगच्छत्।

मञ्जूषा :–

व्याकुलाः, बुद्धिमान्, इन्द्रः, दानशालाम्, एकदा, याचकानाम्

———000———